उत्थिता प्रविशेद्‌या तु पुनस्तां वाह्यतो नयेत् ॥”
इति निम्बादि ॥ २८२ ॥
“पटोलकुण्डलीमुस्तवृषधन्वयवासकैः ।
भूनिम्बनिम्बकट्‌कापर्पटैश्च श्रृतं जलम् ॥
मसूरीं शमयेदामां पक्वाञ्चैव विशोषयेत् ।
नातः परतरं किञ्चिद्विस्फोटज्वरशान्तये ॥”
इति पटोलादि ॥ २८३ ॥
“पटोलमूलारुणतण्डुलीयकं
पिबेद्धरिद्रामलकल्कसंयुतम् ।
मसूरिविस्फोटविदाहशान्तये
तदेव पित्तास्रवमिज्वरापहम् ॥”
इति पटोलादि ॥ २८४ ॥
“पटोलमूलारुणतण्डुलीयकं
तथैव धात्रीखदिरेण संयुतम् ।
पिबेज्जलं सुक्वथितं सुशीतं
मसूरिकारोगविनाशनं परम् ॥”
इति पटोलमूलादि ॥ २८५ ॥
“खदिरत्रिफलारिष्टपटोलामृतवासकैः ।
क्वाथोऽष्टकाङ्गो जयति रोमान्तीश्च मसूरिकाम् ॥
वीसर्पकुष्ठविस्फोटकण्ड्वादीनपि पानतः ॥”
इति खदिराष्टकम् ॥ २८६ ॥
“अमृतादिकषायस्तु जयेत् पित्तकफात्मिकाः ॥”
इति अमृतादि ॥ २८७ ॥
“जातीपत्रं समञ्जिष्ठं दार्व्वीं पूगफलं शमीम् ।
धात्रीफलं समधुकं क्वथितं मधुसंयुतम् ॥
मुखरोगे कण्ठरोगे गण्डूषार्थं प्रशस्यते ॥”
इति जातीपत्रादि ॥ २८८ ॥
“अक्ष्णोः सेकं प्रशंसन्ति गवेधुमधुकाम्बुना ॥”
इति गवेधुमधुकक्वाथः ॥ २८९ ॥
“वेदनादाहशान्त्यर्थं स्रावणाच्च विशुद्धये ।
सगुग्गुलं वराक्वाथं युञ्ज्याद्वा खदिराष्टकम् ॥”
इति वराक्वाथखदिराष्टकौ ॥ २९० ॥
“निम्बातिमुक्ताशोकप्लक्षवेतसपल्लवैः ।
निशापर्य्युषितः क्वाथो मसूरीभयनाशनः ॥”
इति निम्बादि ॥ २९१ ॥ इति मसूर्य्यधिकारः ॥ * ॥
अथ मुखरोगे ।
“बृहतीभूमिकदम्बककण्टकार्य्याः क्वाथः ।
गण्डूषतैलयुक्तः क्रिमिदन्तस्य वेदनाशमनः ॥”
इति बृहत्यादि ॥ २९२ ॥
“क्वाथपानन्तु दार्व्वीत्वड्निम्बतार्क्ष्यकलिङ्गजम् ।
हरीतकीकषायो वा पेयो माक्षिकसंयुतः ॥”
इति दार्व्व्यादिहरीतकीकषायौ ॥ २९३ ॥
“कटुकातिविषादारुपाठामुस्तकलिङ्गकाः ।
गोमूत्रक्वथिताः पेयाः कण्ठरोगविनाशनाः ॥”
इति कटुकादि ॥ २९४ ॥ * ॥
मुखपाके ।
“जातीपत्रामृताद्राक्षायासदार्व्वीफलत्रिकैः ।
क्वाथः क्षौद्रयुतः शीतो गण्डूषो मुखपाकनुत् ॥”
इति जातीपत्रादि ॥ २९५ ॥
“पटोलनिम्बजम्ब्वाम्रमालतीनवपल्लवाः ।
पञ्चपल्लवकः श्रेष्ठः कषायो मुखधावने ॥”
इति पटोलादि ॥ २९६ ॥
“पञ्चवल्ककषायो वा त्रिफलाक्वाथ एव वा ।
मुखपाकेषु सक्षौद्रः प्रयोज्यो मुखधावने ॥”
इति पञ्चवल्कत्रिफलाकषायौ ॥ २९७ ॥
“स्वरसः क्वथितो दार्व्व्या घनीभूतो रसक्रिया ।
सक्षौद्रा मुखरोगासृग्दोषनाडीव्रणापहा ॥”
इति दार्व्वीक्वाथः ॥ २९८ ॥
“सप्तच्छदोशीरपटोलमुस्त-
हरीतकीतिक्तकरोहिणीभिः ।
यष्ट्याह्वराजद्रुमचन्दनैश्च
क्वाथं पिबेत् पाकहरं मुखस्य ॥”
इति सप्तच्छदयष्ट्याह्वादिकषायौ ॥ २९९ ॥
“पटोलशुण्ठीत्रिफलाविशाला-
त्रायन्तितिक्ताद्विनिशामृतानाम् ।
पीतः कषायो मधुना निहन्ति
मुखे स्थितस्तस्य गदानशेषान् ॥”
इति पटोलादि ॥ ३०० ॥
“क्वथितास्त्रिफलापाठामृद्वीकाजातिपल्लवाः ।
निषेव्या भक्षणीया वा त्रिफला मुखपाकहा ॥”
इति त्रिफलादि ॥ ३०१ ॥
इति मुखरोगाधिकारः ॥ * ॥
अथ प्रदरे ।
“दार्व्वीरसाञ्जनवृषाब्दकिरातविल्व-
भल्लातकैरवकृतो मधुना कषायः ।
पीतो जयत्यतिबलं प्रदरं सशूलं
पीतासितारुणविलोहितनीलशुक्लम् ॥”
इति दार्व्व्यादि ॥ ३०२ ॥ * ॥
अथ योनिव्यापदि ।
“गुडूचीत्रिफलादन्तीक्वाथैश्च परिषेचनम् ॥”
इति गुडूचीत्रिफलादन्तीक्वाथाः ॥ ३०३ ॥
अथ गर्भिण्याम् ।
“चन्दनं शारिवालोध्रमृद्वीकाशर्कराऽन्वितम् ।
एष क्वाथः प्रदातव्यो गर्भिण्या ज्वरशान्तये ॥”
इति चन्दनादि ॥ ३०४ ॥
“ह्रीवेरारवुरक्तचन्दनवलाधन्याकवत्सादनी-
मुस्तोशीरयवासपर्पटविषाक्वाथं पिबेद्गर्भिणी ।
नानावर्णरुजातिसारकगदे गर्भाश्रिते वा ज्वरे
योगोऽयं मुनिभिः पुरा निगदितः सूत्यामये-
षूत्तमः ॥”
इति बृहत्ह्रीवेरादि ॥ ३०५ ॥ * ॥
अथ स्तनरोगे ।
“हरिद्रादिं वचादिं वा प्रपिबेत् स्तन्यशुद्धये ॥”
इति हरिद्रादिवचादिक्वाथौ ॥ ३०६ ॥
“तत्र वातात्मके स्तन्ये दशमूलीजलं पिबेत् ॥”
इति दशमूलक्वाथः ॥ ३०७ ॥
“पित्तदुष्टेऽमृताभीरुपटोलं निम्बचन्दनम् ।
धात्री कुमारश्च पिबेत् क्वाथयित्वा सशारिवम् ॥”
इति अमृतादि ॥ ३०८ ॥
“कफे वा त्रिफलाचव्यभूनिम्बकटुरोहिणी ॥”
इति त्रिफलादि ॥ ३०९ ॥
“धात्री स्तन्यविशुद्धार्थं मुद्गाष्टकरसाशना ।
भार्गीदारुवचापाठाः पिबेत् सातिविषाः श्रृताः ॥”
इति भार्ग्यादि ॥ ३१० ॥
“सघृतं त्रिफलाक्वाथं स्तनरोगहरं पिबेत् ॥”
इति सघृतत्रिफलाक्वाथः ॥ ३११ ॥ * ॥
अथ सूतिकारोगे ।
“अमृतानागरसहचरभद्रोत्कटपञ्च-मूलजलद-
जलम् ॥
श्रृतशीतं मधुयुतं निवारयति सूतिकातङ्कम् ॥”
इति सूतिकादशमूलम् ॥ ३१२ ॥
“सहचरपुष्करवेतसमूलं वैकङ्कतदारुकुलत्थ-
समम् ।
जलमत्र ससैन्धवहिङ्गुयुतं सद्यो ज्वरसूतिक-
शूलहरम् ॥”
इति सहचरादि ॥ ३१३ ॥
“दशमूलीकृतः क्वाथः सद्यः सूतीरुजापहः ॥”
इति दशमूली ॥ ३१४ ॥ * ॥
अथ मक्कलशूले ।
“सूताया हृच्छिरोवस्तिशूलं मक्कलसंज्ञितम् ।
यवक्षारं पिबेत्तत्र मस्तुनोष्णोदकेन वा ॥
पिप्पल्यादिगणक्वाथं पिबेद्वा लवणान्वितम् ॥”
इति पिप्पल्यादिगणक्वाथः ॥ ३१५ ॥
इति स्त्रीरोगाधिकारः ॥ * ॥
अथ बालरोगे ।
“भैषज्यं पूर्व्वमुद्दिष्टं नराणां यज्ज्वरादिषु ।
कार्य्यन्तदेव बालानां मात्रा तस्य कनीयसी ॥
हरिद्रादयष्ट्याह्वसिंहीशक्रयवैः कृतः ।
शिशोर्ज्वरातिसारघ्नः कषायः स्तन्यदोषजित् ॥”
इति हरिद्रादि ॥ ३१६ ॥
“विल्वञ्च पुष्पाणि च धातकीनां
जलं सलोध्रं गजपिप्पली च ।
क्वाथावलेहौ मधुना विमिश्रौ
बालेषु योज्यावतिसारितेषु ॥”
इति विल्वादिक्वाथः ॥ ३१७ ॥
“समङ्गाधातकीलोध्रशारिवाभिः श्रृतं जलम् ।
दुर्व्वारेऽपि शिशोर्देयमतीसारे समाक्षिकम् ॥”
इति समङ्गादि ॥ ३१८ ॥
“नागरातिविषामुस्तबालकेन्द्रयवैः श्रृतम् ।
कुमारं पाययेत् प्रातः सर्व्वातीसारनाशनम् ॥”
इति नागरादि ॥ ३१९ ॥
“विल्वमूलकषायेण लाजाश्चैव सशर्कराः ।
आलोड्य पाययेद्बालं छर्द्यतीसारनाशिनीः ॥”
इति सशर्करलाजयुक्तविल्वमूलकषायः ॥ ३२० ॥
“पटोलत्रिफलारिष्टहरिद्राक्वथितं पिबेत् ।
क्षतविस्फोटवीसर्पज्वराणां शान्तये शिशुः ॥”
इति पटोलादि ॥ ३२१ ॥ * ॥
अथ विषे ।
“कटभ्यर्ज्जुनशैरीयशेलुक्षीरिद्रुमत्वचः ।
कषायकल्कचूर्णाः स्युः कीटलूताव्रणापहाः ॥”
इति कटभ्यादि ॥ ३२२ ॥ इति चक्रपाणिदत्तः ॥
पाचनं, त्रि, पाचयिता । इति मेदिनी । ने, ९१ ॥
अथ विशिष्टद्रव्याजीर्णे विशिष्टं पाचनद्रव्यमाह ।
“अलं पनसपाकाय फलं कदलसम्भवम् ।
कदलस्य तु पाकाय बुधैरभिहितं घृतम् ॥
घृतस्य परिपाकाय जम्बीरस्य रसो हितः ॥